## सुयजोर्ङ्वनिप् । (१०३/३०९१)

सुनोतेर्यजतेश्च[1] ङ्वनिप् प्रत्ययो भवति । [2]सुत्वा । यज्वा ॥

## जीर्यतेरतृन् । (१०४/३०९२)

'भूते' (३.२.८४/२९९५) [3]इति वर्तते । जीर्यतेः[4] अतृन् प्रत्ययो भवति भूते । जरन्, जरन्तौ, जरन्तः । वाऽसरूपेण निष्ठा, [5]जीर्णः, जीर्णवान् [6]इति ।

## छन्दसि लिट् । (१०५/३०९३)

भूते इत्येव । छन्दसि विषये धातोः लिट् प्रत्ययो भवति । 'अहं सूर्यमुभयतो ददर्श' (वा.सं. ८.९) । 'अहं द्यावापृथिवी आततान' (तै. ब्रा. १.२.१.३३) । ननु च 'छन्दसि लुङ्लङ्लिटः' (३.४.६/३४२३) इति सामान्येन [7]लिट् विहित एव ? धातुसम्बन्धे स [8]विधिः, अयं त्वविशेषेण ॥

## लिटः कानज्वा । (१०६/३०९४)

[9]छन्दसि लिटः कानजादेशो भवति वा । 'अग्निं चिक्यानः' (मै. सं. ३.३.९) । [10]सोमं सुषुवाणः (मै.सं. ४.४.१०) । 'वरुणं [11]सुषुवाणम्' (तै.सं. २.१.९.१) । न च भवति । '[12]अहं सूर्यमुभयतो ददर्श' (वा.सं. ८.९) । 'अहं द्यावापृथिवी आततान' (तै. ब्रा. १.२.१.३३) । लिड्ग्रहणं किम्, न पूर्वस्यैव प्रकृतस्यादेशविधाने विभक्तिविपरिणामो[13]भविष्यति ? [14]लिण्मात्रस्य यथा स्यात्, योऽपि परोक्षे [15]विहितस्तस्याप्ययम् आदेशो भवति ॥

## क्वसुश्च । (१०७/३०९५)

[16]छन्दसि लिटः [17]क्वसुरादेशः भवति[18] । 'जक्षिवान्' (अ. ४.७.३) । '[19]पपिवान्' (ऋ. १.६१.७) । न च भवति । 'अहं सूर्यमुभयतो ददर्श (वा. सं. ८.९) । योगविभाग उत्तरार्थः ॥

## भाषायां सदवसश्रुवः । (१०८/३०९७)

[20]सद वस श्रु इत्येतेभ्यः परस्य लिटो भाषायां विषये [21]वा क्वसुरादेशो भवति । आदेशविधानादेव लिडपि तद्विषयोऽनुमीयते । उपसेदिवान् कौत्सः पाणिनिम् (म. भा. २.११५) । [22]तेन मुक्ते यथाप्राप्तं प्रत्यया भवन्ति । [23]उपासदत् । [24]उपासीदत् । [25]उपससाद । अनूषिवान् कौत्सः पाणिनिम् । [26]अन्ववात्सीत् । अन्ववसत् । अनूवास । उपशुश्रुवान् कौत्सः पाणिनिम् । उपाश्रौषीत् । उपाशृणोत् । उपशुश्राव । लुङ्लङ्विषये[27] [28]परस्तादनुवृत्तेः [29]क्वसुर्भवति ॥

---

1. धातोः इत्यधिकम् फ, धात्वोः इत्यधिकम् ब. 2. सुत्वा सुत्वानौ सुत्वानः । यज्वा यज्वानौ यज्वानः अ.ब.फ. 3. इत्येव अ.ब. 4. धातोः इत्यधिकम् अ.फ. 5. एते उदाहरणे न स्तः फ. 6. वा ड. 7. विहित एव लिट् फ. 8. विधिस्त्वयमविशेषणः ब. 9. छन्दसि विषये अ. क. 10. सोमं नास्ति अ. ब. क. ड. 11. सुषु– वाणः अ. ब. क. ड. इ. 12. उदाहरणमिदं नास्ति अ. ब. क. ड. 13. भवति अ. ड. 14. एवं तर्हि इत्यधिकम् फ. 15. लिड् इत्यधिकम् अ. क. ड. फ. ह. 16. छन्दसि नास्ति फ, छन्दसि इत्येव अ, छन्दसि इति वर्तते ब. क. 17. क्वसुश्च अ. 18. वा इत्यधिकम् ह. ड. 19. पेचिवान् अ. 20. सदादिभ्यः धातुभ्यः फ. 21. विभाषायां ह. 22. वाक्यमिदं नास्ति ब. 23. लुङि इत्यधिकम् अ. 24. लङि इत्यधिकम् अ. 25. लिटि इत्यधिकम् अ. क. 26. अवात्सीत् फ. 27. अपि इत्यधिकम् फ. 28. पुरस्तात् अ. ब. क. ह. 29. क्वसुः नास्ति अ. ब. क. फ.